# ॥अभ्यसनानि॥

## १

अद्य जीवामः | सदा पचथः | अत्र रक्षति | अधुना रक्षामि | यदा धावथ तदा पतथ | क्व१ यजति | तत्र चरथः | कुतः शंसति | त्यजामि कथम् | पुनः पतावः | दहसि | एवं वदन्ति | तत्र वसावः | सर्वत्र जीवन्ति ॥

## २

सदा देवान्स्मरन्ति । गृहं गच्छामः । जलं पिबति पुत्रः । नृपौ जयतः । कदा फलानि यच्छथः । कुत्राधुना गजं नयामि । तरन्ति देवाः । तरथ हे देवाः । ग्रामे गच्छति नरः । नरः पुत्रौ पश्यति । देवं यजावः । पुत्रा ग्रामं गच्छन्ति । तत्र गृहे भवतः । सर्वत्र दानानि वर्षन्ति नृपाः ॥

## ३

धनानि गृहेषु गूहन्ति । कुन्तान्हस्ताभ्यां क्षिपामः । नृपाय नरौ मार्गं दिशतः । मार्गेण ग्रामं गच्छावः । सुखेनेह गृहे तिष्ठति पुत्रः । जलं सिञ्चति मेघः । धनेन सुखमिच्छन्ति नराः । हस्तयोः फले तिष्ठतः । जलं हस्तेन स्पृशसि । नरौ कटे सीदतः । क्षेत्राणि लाङ्गलैः कृषन्ति । नगरं नृपौ विशतः । नरः पुत्रेण मार्गं गच्छति । नरान्सृजति देवः । बालौ गृहे ह्वयति नरः ॥

## ४

सदा देवा जनान्मुञ्चन्ति पापात् । नृपस्य पुत्रौ क्व वसतः । ऋषिर्दुःखात्पुत्रं गोपायति । नृपो३ऽसिनारेः पाणी कृन्तति । कवयो हरिं शंसन्ति । अरयो जनानां धनं लुम्पन्ति । जलं गिरेः पतति । शरान्विषेण लिम्पथ । वृक्षा गिरौ रोहन्ति । ऋषेः पुत्रौ तत्र मार्गे तिष्ठतः । हरिः कविभ्यां दानानि यच्छति । ऋषिभी रामो वसति । अग्निनारीनां गृहाणि नृपा दहन्ति । हरिं क्षीरेण यजतः ॥

## ५

कवयो धनं लुभ्यन्ति । ऋषिः सूक्तानि पश्यति । गुरू शिष्ययोः क्रुध्यतः । नृपा अरिभ्यः कुप्यन्ति । अग्निरुदधौ तिष्ठति । परशुना वृक्षान्कृन्तथ । जलस्य बिन्दवो गिरेः पतन्ति । विष्णुमृषिर्यजति नृपाय । नृपोऽश्वमारोहति । क्षेत्रेषु जलं शुष्यति । गुरवः शिष्याणां स्निह्यन्ति । नृपाणां शत्रवोऽसिना नश्यन्ति । बालो गुरवे पत्त्रं लिखति । जना मणीनां राशीनिच्छन्ति । आ गिरेर्वृक्षा रोहन्ति । बाहुभ्यां जलं नरास्तरन्ति ॥

## ६

ऋक्षा मधु लुभ्यन्ति । ऋषिरधुना पाणिना जलमाचामति । नृपा अक्षैस्तत्र
दीव्यन्ति । अलिर्मधुना माद्यति । नरा विषेणासीँल्लिम्पन्ति । रामः
क्षत्रियान्परशुनाक्राम्यति । गुरूञ्छिष्यांश्च शंसामः । अरयो जनानां वसूनि
हरन्ति । नरौ मृत्युमृच्छतः । बालस्य नेत्राभ्यामश्रूणि पतन्ति । जलेनाग्निः
शाम्यति । ऋषेरश्वौ श्राम्यतः । गुरुः शिष्यस्य पापात्ताम्यति । गजा नगरे
भ्राम्यन्ति । मधुना क्षीरेण च तुष्यन्ति बालाः ॥

## ७

स्तेनः सुवर्णं नृपस्य गृहाच्चोरयति । गुरुर्दण्डेन शिष्यांस्ताडयति ।
सूतोऽश्वान्पीडयति । ऋषिर्जलेन पाणी क्षालयति । ग्रामाज्जनान्नगरं
नयन्ति । नरौ रूपकाणि गणयतः । नृपाच्छत्रूणां दण्डः । रामस्य
पुत्रौ जनेभ्यो रामायणं कथयतः । सुवर्णं पाणिभ्यां तोलयामः । जनकः
पुत्रान्कोपाद्दण्डयति । गृहाल्लोका आगच्छन्ति । पुण्येन साधुर्दुःखानि
पारयति । देवानिव नृपतीँल्लोकः पूजयति ॥

## ८

वायोर्बलेन तरवः कम्पन्ते । असिनाद्यारयो म्रियन्त इत्यत्र नृपो भाषते
। वसूनां राशीन्नृपतीन्कवयोऽर्थयन्ते । शास्त्रे अधुना शिक्षामह इति पत्त्रे
बालो जनकाय लिखति । पापाद्दुःखं जायते । शिष्याणां विनय उद्योगश्च
गुरुभ्यो रोचेते । अधर्माय न धर्माय यतेथे । विष्णोः सूक्ते ऋषी लभेते
। अत्रर्षिर्भानुं वन्दते । अग्नी ईक्षते बालः । धनेन पशूँल्लभध्वे यज्ञाय
। सदा गुरोः पादौ बालाः सेवन्ते । फले अत्र मनुष्यस्य पाण्योस्तिष्ठतः ।
सहेते अनर्थं साधू । वनेष्विहर्क्षा वसन्ति । क्षत्रिया ऋषी सेवन्ते ॥

## ९

रत्नं रत्नेन संगच्छते । यदा विहगा व्याधं पश्यन्ति तदा सहसोड्डयन्ते ।
सत्यं हृदयेषु मृगयन्त ऋषयः । हरेः कन्यां रामः परिणयति । विष्णोर्हरेश्च
भार्ये कन्याभिः सहागच्छतः । रामो विष्णुश्च देवाञ्छरणं प्रपद्येते । भिक्षया
रामस्य शिष्यौ वर्तेते । यदा जना गङ्गायां म्रियन्ते तदा स्वर्गं लभन्ते ।
कन्याया अन्नं यच्छत्यृषेर्भार्या । वन ऋक्षेष्विषून्मुञ्चन्ति व्याधाः कृष्णौ च
म्रियेते । द्विजातीनां भाषां शूद्रा नावगच्छन्ति । हे शिष्या नगरस्य रथ्यासु
साधूनां भार्याभ्यो भिक्षां लभध्वे । अत्र छायायां प्रभूता विहगास्तिष्ठन्ति ।
क्षत्रियस्य बालावृषिरुपनयति ॥

## १०

रामेण पुत्रावद्योपनीयेते इति श्रूयते । ऋषिर्नृपेण धर्मं पृच्छ्यते । घटी घृतेन पूर्यते । विहगाः पाशैर्बध्यन्ते । जनैर्नगरं गम्यते । हे शिष्या गुरुणाहूयध्वे । नरैः कटाः क्रियन्ते । कविभिर्नृपाः सदा स्तूयन्ते । प्रभूता भिक्षा गृहस्थस्य भार्यया भिक्षुभ्यो दीयते । कन्याभ्यां गीतं गीयते । स्तेनैर्लोकानां वसु चोर्यते । इषुभी रणेऽरयो नृपतिना जीयन्ते । हे देवौ साधुभिः सदा स्मर्येथे । पुण्येन जनास्तीर्यन्ते । प्रभूतः काष्ठानां भारो नरेणोह्यते । अश्वेन जलं पीयते । धर्मेण राज्यं शिष्यते नृपेण । सर्पेण दश्येते नरौ । सूतेनाश्वास्ताड्यते ॥

## ११

नृपतिर्नगरीं सेनयाजयत् । कवयः सभायां काव्यान्यपठन् । देवीर्देवांश्च हरिरपूजयत् । साधोः पत्न्या भिक्षवे रूपकाणि दीयन्ते । नदीषु मत्स्यानपश्याम । पुस्तकं पुत्र्या अयच्छद्विष्णुः । नगर्या रथ्यासु गजावभ्राम्यताम् । पृथिव्या विहगा उड्डयन्ते । गृहं पूरेणोह्यते । पत्नीभिर्नरा नगर आगच्छन् । यदा शिवो विष्णुश्च ग्रन्थमपठतां तदार्थं नावागच्छाव । शिष्या गुरोर्गृहं प्राविशन्नुपाविशंश्च कटयोः पृथिव्याम् ॥

## १२

मक्षिका व्रणमिच्छन्ति धनमिच्छन्ति पार्थिवाः ।
नीचाः कलहमिच्छन्ति शान्तिमिच्छन्ति साधवः ॥ १॥

शान्त्यर्षय इह शोभन्ते । श्रुतौ बह्वीषु स्मृतिषु च धर्म उपदिश्यते । रात्र्यां स्वप्नं न लभामहे । बह्वीं कीर्तिं धृत्याविन्दन्नृपतिः । पुण्येन मुक्तिं लभध्वे । बहूनिषून्रणेऽरिष्वक्षिपन्नृपतिः । हन्वामश्वाँल्लघ्वा यष्ट्याताडयम् । नृपतेर्बुद्ध्या क्षत्रियाणां कलहोऽशाम्यत् । शूद्राणां जातयो नीचा गण्यन्ते । द्विजातीनां जातिषु ब्राह्मणा मुख्याः । धर्मो भूत्यै कल्पते । जात्या क्षत्रियौ वर्तेथे । भूमेर्भागं ब्राह्मणायायच्छत्पार्थिवः । अश्वा अश्राम्यन्भूमावपतंश्च ॥

## १३

लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ २ ॥

नृपतिर्ऋषीणां पापात्प्रत्यषिध्यत । हरेर्भार्यायां चारवः पुत्रा अजायन्त । धीरं पुरुषं श्रियः सदा निषेवन्ते । पार्थिवस्याज्ञां शत्रू अत्यक्रमेताम् । पद्मं श्रिया वसतिः । धियो बलेन पुरुषा दुःखानि पारयन्ति । रथोऽध्यष्ठीयत रामेण । कवेर्गृहं श्रियाशोभत । शिशू आह्वयेथां जनन्या । दिनेदिने

भानुमैत्तर्षिः । गुरोरनुज्ञया कटे शिष्यावुपाविशताम् । मुनिरीश्वरस्य सृष्टिं ध्यायति । क्षेत्रेषु धान्यं१ निष्पद्यते । गुरवो ग्रन्थान्रचयन्ति शिष्याश्च पुस्तकानि लिखन्ति ॥

## १४

धर्मं चरत माधर्मं सत्यं वदत मानृतम् ।
दीर्घं पश्यत मा ह्रस्वं परं पश्यत मापरम् ॥ ३ ॥

जयतु महाराजश्चिरं च कृत्स्नां भुवमधितिष्ठतु । प्रयागं गच्छतं सुखेन च तत्र निवसतम् । सुन्दर्या भ्रुवौ वक्रे दृश्येते । गुरव आसने निषीदन्तु भुवि शिष्याः । स्नुषाभिः सह श्वश्रूणां कलहः प्रावर्तत । हे क्षत्रियाः कुन्तान्क्षिपतेषून्मुञ्चत पापाञ्शत्रून्दण्डयतेति क्रोधान्नृपतिरभाषत । अतिथिं पृच्छतु रात्रौ कुत्र न्यवस इति । श्वश्र्वाः३ कोपाच्छोचतः स्नुषे । वध्वाः स्निह्यत्यृषिः । पाठस्याभ्यासाय शिष्यावागच्छतामिति गुरोराज्ञा । जुह्वा३ग्नौ घृतं प्रास्याणि । हे वधु वाप्या जलमानय । जुह्वां घृतं तिष्ठति । भ्रुवोरधस्तान्नेत्रे वर्तेते ॥

## १५

दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः ।
सर्पो दंशति कालेन दुर्जनस्तु पदे पदे ॥ ४ ॥

आचार्य लभस्व प्रायश्चित्तं समाचरेति पापं द्विजातय आदिशन्ति । काव्यानि रचयाम कीर्तिं विन्दाम नृपतीनाश्रयामहै श्रियं लभामहा इति कवयो वदन्ति । स्वसुर्गृहे कन्ये न्यवसताम् । नृपे रक्षितरि सुखेन प्रजा वसन्ति । धर्माय देवान्यजावहा अर्थाय कीर्तये च सभासु पण्डितैः सह विवदावहा इति ब्राह्मणस्य पुत्रयोर्निश्चयः । मुक्तय ईश्वरः सृष्टेः कर्ता मनुष्यैर्भक्त्या सेव्यताम् । नृपतयः प्रजानां रक्षितारो दुर्जनानां च शास्तारो वर्तन्ताम् । शास्त्रस्य कर्त्रे पाणिनये नमः । लोकस्य स्रष्टृभ्यो वसूनां दातृभ्यो देवेभ्यो नमो नमः ॥

## १६

गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ ५ ॥

भर्तारं भर्तुश्च पितरं मातरं च पत्नी देवानिव पूजयेत् । गा रक्षेद्गवां रक्षणेन पुण्यं भवतीति द्विजातयो मन्यन्ते । यदा प्रयाग आगच्छेव तदा पित्रे पत्त्रं लिखेव । पितृभ्यो मासे मासे श्राद्धं यच्छेयुः । ग्राममद्य गच्छतमिति मातरौ पुत्रावभाषेताम् । गोः क्षीरेण शिशवो मोदन्ताम् । गामतिथये पचेमेति गृहस्थो भार्यामवदत् । दुहितरं पितरौ रक्षेतां स्वसारं

भ्रातरौ मातुः पुत्राश्च रक्षेयुः । यदि शास्त्रमभ्यस्येयं तदा गुरवस्तुष्येयुः । हे स्वसः पित्रोर्गृहे तिष्ठेः । बाहुभ्यां नदीं न तरेत् । हे शिशवः पितॄन्सेवध्वं भ्रातॄणां स्निह्यत ॥

# १७

नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निदेशं भृतको यथा ॥ ६ ॥
ग्रामण्यां स्तेनाः शरानमुञ्चन् । यदि नराः श्रुतेः स्मृतेश्च विधीननुतिष्ठेयुस्तदा साधुभिः शस्येरन् । वैश्याः कृष्या वाणिज्येन पाशुपाल्येन वा वर्तेरन् । संदिग्धां नावं नारोहेत् । यदि गङ्गाया वारिणि म्रियेध्वं तदा स्वर्गं लभेध्वम् । जामातरः श्वशुरान्स्नुषाः श्वश्रूर्दुहितरश्च पुत्राश्च पितरौ सेवेरन् । ब्राह्मणैर्नावोदधिर्न तीर्येत । शत्रून्पराजयेथा इति नृपतिं प्रजा वदन्ति । नृपती अरिभिर्युध्येयाताम् । नौषु नृणां युद्धमभवत् । बालावुद्याने रमेयाताम् ॥

# १८

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम् ॥ ७ ॥
सूत अधुना स्थापय रथम् । यथाज्ञापयति देवस्तथा क्रियताम् ।
दशरथश्चतुरः पुत्रानजनयत् । कालिदासस्य काव्यं मां श्रावयेः ।
वैश्यान्करानदापयन्नृपः । उपनयने बालान्नवीनानि वस्त्राणि परिधापयेयुः । भ्रातरोऽस्मान्नगरं प्रास्थापयन् । स्वसार आगच्छन्तीति मह्यं न्यवेद्यत । वायोर्बलेन तरवोऽपात्यन्त । क्षत्रिया युद्धे३ ऽरीन्मारयन्ति । कवयोऽस्माकं गुणान्प्रथयेयुः कीर्तिं च वर्धयेयुरिति पार्थिवैरिष्यते । अहं प्रयागे निवसामि रामः काश्यां तिष्ठति । ग्रन्थो३ ऽस्माभी रच्यते पुस्तकं रामेण लेखयामः ॥

# १९

आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥ ८ ॥
येन येन च वातेन वारिदो वारि मुञ्चति ।
तेन तेन च वातेन छत्त्रं वहति पण्डितः ॥ ९ ॥
मयि त्वयि च पितरौ स्निह्यतः । यः पृथ्वीं पालयति स पार्थिव उच्यते । कस्यै देव्यै स्तोत्रं रचयेम । गुरुर्युष्मानाह्वाययत् । या अस्मान्दुग्धं पाययन्ति ता धेनूर्मा घातयत । युष्मन्मम दुःखं भवति । साधवः पुण्यैः स्वर्गं लभन्ते न त्वितरे जनाः । वयमेतत्पुस्तकं नेच्छामस्तदन्यस्मै कस्मैचिद्दीयताम् । त्वदन्यो न कोऽप्यस्माभिः शस्यते । या देवकी वसुदेवस्य पत्न्यभवत्तस्यां कृष्णोऽजायत

। तव पित्रा सह नगर्या आगच्छाम । यूयं पितॄञ्छ्राद्धैः प्रीणयथ वयं जलेन
। विश्वे देवास्त्वा पालयन्तु । अन्येषां काव्यैरेष कविः कीर्तिमसाधयत् ॥

## २०

सहायेन विना नैव कार्यं१ किमपि सिध्यति ।
एकेन चरणेनापि गतिः कस्य प्रवर्तते ॥ १० ॥
ते पुत्रा ये पितुर्भक्ताः स पिता यस्तु पोषकः ।
तन्मित्रं यत्र विश्वासः सा भार्या३ यत्र निवृतिः ॥ ११ ॥
हे शिष्य समिधो वनादाहर । उपनिषत्सु मुक्तेर्मार्ग उपदिश्यते ।
आपदि सुहृदोऽस्मान्पालयेयुः । विश्वस्यां भुवि पापा भूभृद्भिर्दण्ड्यन्ताम्
। समिद्भिरग्निं यजेत । पुण्येन जगती जयेः । त्वं जीव शरदः शतम्
। भूभृतः शिखरं वयमारोहाम यूयमधस्तादतिष्ठत । काश्चित्सरितः
समुद्रेण काश्चिदन्याभिः सरिद्भिः संगच्छन्ते । रात्रौ तडिद्दृश्यत । भक्ताः
सुहृदोऽस्मान्सुखं लम्भयन्ति । अश्रुभिर्योषितो बालाश्च मनोरथान्साधयन्ति ।
शरदि कासुचित्सरित्सु पद्मानि दृश्यन्ते ॥

## २१

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः ॥ १२ ॥
मरुतः सर्वाभ्यो दिग्भ्यो वहन्ति । सम्राजोऽपि राज्यं द्विड्भिर्व्यनाश्यत । तव
वाक्षु कालिदास माधुर्यं वर्तते । यदा दिशो दहन्ति तदा शिष्यान्नाध्यापयेत्
। वाष्पैरुद्धाभ्यां दृग्भ्यां पिता पुत्रमैक्षत पर्यष्वजत च । ऋत्विजां
वाक्कामधुक्सा सर्वान्नृणां मनोरथान्पूरयति । सर्वासु दिक्षु द्विषोऽदृश्यन्त
। परिव्राड्वाचं नोत्सृजेत् । मित्रध्रुक्सर्वेषां विद्विष्टः । स्रग्भिरुपानद्भ्यां
समेताः शिष्या गुरुं नोपतिष्ठेरन् । रुग्भिराक्रान्ता बहवो जना म्रियन्ते ।
दक्षिणस्यां दिशि कृष्णो३ऽन्ध्राणां सम्राडभवत् । मधुलिड्भिरेष बालोऽदश्यत
॥

## २२

गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति वै द्विजाः ।
चारैः पश्यन्ति नरपाश्चक्षुर्भ्यामितरे जनाः ॥ १३ ॥
आ कर्णमाकृष्टेन धनुषा द्विट्सु शरान्मुञ्चन्ति क्षत्रियाः । सूर्यश्च चन्द्रमाश्च
जगतो ज्योतिषी । धनी वणिग्द्वारि स्थितेभ्यस्तपस्विभ्यो वसु दापयेत्
। यज्ञेषु य ऋत्विजो यजूंषि पठन्ति तेऽध्वर्यव उच्यन्ते । विश्वस्या भुवः
सम्राट्पुरूरवा उर्वशीमप्सरसं पर्यणयत्तस्यां च पुत्रोऽजायत । कामस्य
धनुषि ज्यायाः स्थानेऽलयः शराणां स्थाने सुमनसस्तिष्ठन्ति । प्राणिनां

मनांसि जीविते सजन्ति । पुरि वास्तडागान्नाल्या पार्थिवोऽनाययत् । मन्त्रिणः स्वामिने कदापि न द्रुह्येयुः । एतस्या धेन्वाः३ पयो बालान्पितरावपाययताम् ॥

# २३

सन्तोऽपि नहि राजन्ते दरिद्रस्येतरे गुणाः ।
आदित्य इव भूतानां श्रीर्गुणानां प्रकाशिनी ॥ १४ ॥

तिष्ठन्तं गुरुं शिष्यो ऽनुतिष्ठेद्गच्छन्तमनुगच्छेद्धावन्तमनुधावेत् । गरीयसः श्रेयसे पूजयेत् । धनिनस्तपस्विभ्यो धनं ददतः शस्यन्ते । स्निह्यन्तीं भार्यां३ त्यजन्निन्द्यते । जीवतः पुत्रस्य मुखं पश्यन्तौ पितरौ तुष्यतः । भ्रात्रो रामो यशसा गरीयान् । एतेषां वणिजां धनानि महान्ति वर्तन्ते । कुप्यते मा कुप्यत । उद्याने पतङ्गो विहगेभ्यो धान्यं१ किरतीः कन्या अपश्यम् । पित्रोर्जीवतोर्भ्रातरः स्वसारश्च तयोर्धनस्य स्वामिनो न भवेयुः । धेनुं धयन्तं वत्सं मापसारय । गुरुषु पिताचार्यौ माता च गरीयांसः । त्वयि जीवति सुखेन वयं जीवामः ॥

# २४

नोद्वेजयेज्जगद्वाचा रूक्षया प्रियवाग्भवेत् ।
प्रायेण प्रियकर्मा यः कृपणोऽपि हि सेव्यते ॥ १४ ॥

यावन्ति हतस्य पशोश्चर्मणि लोमानि विद्यन्ते तावन्ति वर्षाणि हन्ता नरके वसेत् । भृत्या बलवन्तं राजानमायुष्मन्निति वदन्तु । भास्वन्तं सूर्यं दिने द्विजातयः पूजयन्तु । कियतो मासान्भवान्काश्यां न्यवसत् । केचिद्यतयो भस्मना शरीरं मार्जयन्ति । कर्म बलवदिति मतिमतो दरिद्रान्पश्यतो मे मतिः । त्वयि राज्ञि तिष्ठत्यस्माकं सर्वासां च प्रजानां सुखं न विनश्येत् । एकस्मिञ्जन्मनि ये शूद्रा अजायन्त त आत्मनां धर्मान्सम्यगनुतिष्ठन्तो द्वितीये जन्मनि द्विजातयो भवेयुः । ग्रामे परिव्राण्न तिष्ठेद्वने परिभ्रमन्ब्रह्म ध्यायेत् । एतस्यां पुरि श्रीमतो राज्ञः समागमोऽजायत । ब्रह्मा जगतः स्रष्टा वेदेषु श्रूयते ॥

# २५

विद्वान्प्रशस्यते लोके विद्वान्गच्छति गौरवम् ।
विद्यया लभ्यते सर्वं विद्या सर्वत्र पूज्यते ॥ १६ ॥

प्राच्यां दिशि ज्योतींष्युद्गच्छन्ति प्रतीच्यामस्तंगच्छन्ति । विद्वद्भिरेव विदुषां श्रमो ज्ञायते । त्वष्टुस्त्रिशीर्षाणं पुत्रं मघवामारयत् । अहनी एव क्षत्रियावयुध्येताम् । शुना दष्टो द्विजातिः स्नानमाचरेत् । काश्या आजग्मुषो भ्रातॄनपश्याम । येन वेदा अधीतास्तं युवानमपि गुरुं गणयन्ति

। पापाः कर्मणां विपाकेन द्वितीये जन्मनि तिर्यञ्चु जायन्त इति स्मृतिः । विद्वांसो विद्वद्भिः सह समागमाय स्पृहयन्ति । कियद्भिरहोभिः काश्याः प्रयागमगच्छत । प्राचां देशे पाटलिपुत्रं नाम महन्नगरं विद्यत उदीचां तक्षशिला प्रचीतां भृगुकच्छम् ॥

## २६

पत्यौ भक्तिर्व्रतं स्त्रीणामद्रोहो मन्त्रिणां व्रतम् ।
प्रजानां पालनं चैव नियतं भूभृतां व्रतम् ॥ १७ ॥
बलवन्तावनड्वाहौ लाङ्गलं वहेताम् । शिवास्ते पन्थानः ।
लक्ष्मीर्विष्णोर्भार्या । हृद्येऽष पुमान्परं ब्रह्म ध्यायति । दोर्भ्यां भूभृत्कृत्स्नं जगद्जयत् । केन पथा भवान्सख्या सहागच्छत् । पदा मामस्पृशत्सखा । पुम्भिः सह स्त्रीरागमयद्राजा । हे युवन्पन्थानं मे दर्शय । अद्भिः पादौ क्षालयत्येष परिव्राट् । स्त्री पत्ये रूपकाण्यर्पयति । एकेनाक्ष्णा यो न किंचित्पश्यति तं काणं वदन्ति । द्यौः पिता पृथिवी च माता वो रक्षताम् । एते पुमांसो हृद्येषु पापं गूहयन्ति । ब्रह्मघ्ना सह न संभाषेत न च तमध्यापयेद्याजयेद्वा ॥

## २७

वर्धमानमृणं राजन्परिभूताश्च शत्रवः ।
जनयन्ति भयं तीव्रं व्याधयश्चाप्युपेक्षिताः ॥ १८ ॥
यानि कर्माण्यस्मिँल्लोके क्रियन्ते तेषां फलं कर्त्रामुष्मिँल्लोक उपभुज्यते । भो असावहमित्युच्चारयन्गरीयसोऽभिवादयेत् । अयं नः पिता रथादवतीर्णः सख्या सह संभाषमाणस्तिष्ठति । आचारेण हीनं पुमांसं विद्वांसमप्यवगणयन्ति सन्तः । उदधौ मग्नं म्रियमाणं भुज्युमश्विनौ नावोदहरताम् । एभ्यः क्षुधा सीदद्भ्यो भिक्षुभ्योऽन्नं प्रयच्छ । पथ्य१स्माकं रथो भग्नः । युध्यमानानमूननडुहः पश्य । भवता विकीर्णं धान्यमिमे विहगा भक्षयन्ति । आभिरद्भिः पाणी प्रक्षालय । इदमासनमिमा आपः स्नानायायं मधुपर्क इदं भोजनमिमानि वस्त्राणीयं शय्येति गृहस्थोऽतिथिं गृहमागच्छन्तं वदेत् ॥

## २८

श्रीमतो राज्ञः संमतैरेभिः कविभिरिष्टानि वसूनि लब्धानि । कुतो भवानागत इति द्वारि स्थितः परिव्राड्गृहस्य पत्या पृष्टः । श्वभिर्गृहीतो हरिणो व्याधैर्व्यापादितः । मूढः खरः क्रोष्टोः स्निग्धाभिर्वाग्भिः प्रतारितः सिंहस्य गुहायामागतस्तेन हतः । क्षेत्रेषु सिक्ताभिर्मेघानामद्भिर्धान्यं प्ररूढम् । पदा स्पृष्टं शुनाघ्रातमन्नं भस्मनोपस्तीर्णं वाचा प्रशस्तं द्विजातिना

भुक्तम् । काश्यामुषितैर्भ्रातृभिः शास्त्राणि सम्यगधीतानि तेषामाचार्येण लिखितात्पत्त्रादवगम्यते । उदीच्या दिशो यवनेष्वागच्छत्सु पृथ्वीराज इन्द्रप्रस्थात्सैन्येन सह निष्क्रान्तः । पथि संगच्छमानैर्द्विड्भिः सह महद्युद्धं संजातम् । तस्मिन्राजा पराजितः शरैर्विद्धो हस्तिनो भूमौ पतितो यवनैर्जीवन्नेव गृहीतः पश्चाच्चासिना घातितः ॥

## २८

गते हि दुर्दशां लोके क्षुद्रोऽप्यहितमाचरेत् ।
पङ्के निमग्ने करिणि भेको भवति मूर्धगः ॥ १८ ॥

गुरावुषित्वा वेदमधीत्य स्त्रीं परिणीय पुत्रं जनयित्वा नित्यानि कर्माण्यनुष्ठाय यज्ञानिष्ट्वा दानानि च दत्त्वा ब्राह्मणो न च्यवते ब्रह्मणो लोकात् । भुक्त्वा पीत्वा चैते नराः सुप्ताः । धीमतां मन्त्रिणामागमनं स्वामिने निवेद्य भृत्यो निष्क्रान्तः । सख्या हनुमतान्यैश्च कपिभिः समेतोऽपां भर्तरि सेतुं बद्ध्वा लङ्कां प्रविश्य च रामो रावणं हतवान् । कृत्स्नं वनं दग्ध्वा हुतभुगधुना शान्तः । बलवतो मरुत आदाय मघवा गवामाहरणाय निर्गतः । शिष्यानाहूय गुरुस्तैः सम्यग्वन्दितस्तानृचो यजूंषि चाध्यापितवान् । हविषेष्ट्वर्त्विग्भ्यो भूयो धनं यजमानेन दत्तम् । त्वां मुक्त्वा न केनापि तादृग्दुःखं सोढम् । गूढैश्चारैः शत्रूणां बलं विदित्वा कार्याणि मन्त्रिषु न्यस्य सैन्य आप्ताञ्शूरानधिकृत्य राजा युद्धाय निर्गच्छेत् ॥

## ३०

सर्वे पौराः कालिदासेन रचितं नाटकं द्रष्टुमागच्छन् । सर्वान्द्विषो दोर्भ्यां जेतुं स्वामी समर्थ इति प्रियवादिनो भृत्या राजानमुक्तवन्तः । पापान्यपमार्ष्टुमपोऽवगाह्यर्चः पठनीयाः सामानि वा गेयानि । तीव्रं तपस्तप्तुं यतिर्वनाय प्रस्थितः । अश्वमारोढुमधुना मे पथि श्रान्तस्य मतिर्जाता । पितृभ्यो दातव्यमृणमपाकर्तुं ब्राह्मणः पुत्रं जनयेत् । स्वर्गं लब्धुं भूयसो यज्ञान्यष्टुमर्हसि । सर्वासु दिक्षु स्वैरं चरितुं यज्ञियोऽश्वो भवद्भिर्मोक्तव्य इति राज्ञादिश्यत । भवतां भाषां नावगन्तुं शक्यते । पुष्टावनड्वाहौ शकटे योक्तुं कृषीवल आदेष्टव्यः । स्वयंभुवा जगत्स्रष्टुं मनः कृतम् ॥

## ३१

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः ।
सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सतां सकृत् ॥ २० ॥

सप्तानामृषीणां शरीराणि दिवि राजमानानि दृश्यन्ते । चत्वारो वेदा विद्यन्तेऽष्टादश पुराणानि षट्त्रिंशत्स्मृतयः षड् दर्शनानीति विदुषां मतम् । चतुर्णां वेदानां तु बहवः शाखा वर्तन्ते । तदथर्ववेदस्य पञ्च शाखा

यजुर्वेदस्य षडशीतिः सामवेदस्य सप्ताथर्ववेदस्य नवेति सर्वाः संकलय्य सप्तोत्तरं शतं शाखानां श्रूयते । सांप्रतं चत्वारि सहस्राणि नव शतानि त्र्यशीतिश्च कलियुगस्य वर्षाण्यतिक्रान्तानि । श्रीविक्रमादित्यादनन्तरं पञ्चपञ्चाशोत्तरे शततमे संवत्सरे शकानां राजाभिषिक्तः । अधुना ल१ष्टादश शतानि चत्वारि च शकानां राज्ञो वर्षाणि गतानि । त्रीणि लक्षाणि गवां षोडश ग्रामाश्चर्षभदत्तेन ब्राह्मणेभ्यो दत्तानि । स एव वर्षे वर्षे शतसहस्रं ब्राह्मणानामभोजयत् ॥

# ३२

ज्येष्ठो भ्राता पिता वापि यश्च विद्यां प्रयच्छति ।
त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः ॥ २१ ॥

मोक्षाय ज्ञानं यज्ञेभ्यः साधीय इति पुराणैरुक्तम् । सांप्रतं तु भक्त्या श्रेयो लब्धुं द्विजातयो यतन्ते । त्रयः कनीयांसो भ्रातरो रामस्याभवन् । यवीयसीं भार्यां परिणयेत् । यदि ज्येष्ठायां भार्यायां कनिष्ठः पुत्रो जायेत तदा स एव श्रेष्ठं धनस्य भागं लभेतेत्येके । परमात्माणोरप्यणीयान्महतोऽपि महीयान्वेदान्तेषु वर्ण्यते । पञ्चभिरेताभिर्नदीभिः सह संगतः सिन्धुर्गङ्गाया अपि वरीयान्दृश्यते । या अष्टाविंशतिर्दक्षस्य दुहितरश्चन्द्रमसा परिणीतास्तासां रोहिणी भर्तुः प्रेष्ठाभवत् । स्तेनेभ्यः सुरापाः पापीयांसः स्मर्यन्ते । पापानां पापिष्ठास्तु ब्रह्महणः । प्रथीयो यशस्त्रिषु लोकेष्वर्जुनेन लब्धम् ॥

# ३३

दुष्यन्तो नाम राजर्षिः पूरुवंशतिलकस्त्रिलोक्यां विश्रुतः पुरा कृत्स्नां पृथिवीमपालयत् । स चैकदा मन्त्रिसूतसैनिकान्वितो मृगयाक्रीडार्थे महावनं प्रविष्टः । तस्मिन्वने दुष्यन्तो ऽनेकान्व्याघ्रसिंहर्क्षद्वीपिनो ऽन्यांश्च वनेचरान्प्राणिनः स्वशरैर्व्यापादयत् । एकं तु हरिणं पलायमानं रथस्थो ऽनुसरन्स नदीतीरे दिव्याश्रमपदं दृष्टवान् । कण्वस्य ब्रह्मर्षेरयमाश्रम इति सूतमुखाच्छ्रुत्वा सैनिकान्वने संस्थाप्यर्षिं नन्तुं राजा तत्र प्रविष्टः । तदा कण्वे तीर्थयात्रार्थं प्रोषिते सति तस्य कृत्रिमा दुहिता शकुन्तला नाम सखीसमेता महाराजमतिथिसत्कारेण पूजयितुमाश्रमान्निर्गता ॥

# ३४

अतितृष्णा न कर्तव्या३ तृष्णां नैव परित्यजेत् ।
अतितृष्णाभिभूतस्य चूडा भवति मस्तके ॥ २२ ॥

कस्मिंश्चिद्वने पुलिन्दः प्रतिवसति स्म । स चैकदा मृगयां कर्तुं प्रस्थितः । अथ तेन प्रसर्पता पर्वतशिखराकारो महावराहः समासादितः । तं

दृष्ट्वा कर्णान्ताकृष्टशरेण स तेन समाहतः । तेनापि वराहेन कोपाविष्टेन बालेन्दुद्युतिना दंष्ट्राग्रेण पाटितोदरः पुलिन्दो गतप्राणो भूमावपतत् । अथ व्याधं व्यापाद्य वराहो ऽपि शरप्रहारवेदनया मृतः । एतस्मिन्नन्तरे कश्चिदासन्नमृत्युः शृगाल इतस्ततः परिभ्रमंस्तं देशमागतः । यावद्वराहपुलिन्दौ पश्यति तावत्प्रहृष्टो ऽचिन्तयत् । भोः सानुकूलो मे विधिः । तेनैतदचिन्तितं भोजनमुपस्थितम् । तदहं तथा भक्षयामि यथा बह्वन्यहानि मे प्राणयात्रा भवति । तत्तावत्प्रथमं स्नायुपाशं धनुष्कोटिगतं भक्षयामि । एवं मनसा निश्चित्य धनुष्कोटिं मुखे क्षिप्त्वा स्नायुं भक्षयितुमारब्धः । ततश्च कर्तिते स्नायौ तालु विदार्य धनुष्कोटिर्मस्तकमध्येन निष्क्रान्ता । सोऽपि मृतः ॥

# ३५

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।
आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ॥ २३ ॥

बलहीना अपि बुद्धिप्रभावेन महान्तं दुःखोदधिं तरीतुं शक्नुवन्ति । वानप्रस्थः शय्यार्थं भूमिं नवपत्त्रैर्हरिणचर्मभिश्चोपास्तृणोत् । स्वपितरावुद्यानादाह्वातुं बालं प्रहिणु । हे मघवन्पर्णिभिरपहृता अस्मद्गाः प्रत्याहर्तुं मरुतः सहायानादाय गुहाया द्वारमपावृणुया इत्यृषिभिरिन्द्रः प्रार्थ्यत । वनवृक्षान्धुन्वानस्य वायोः शब्दं पथा गच्छन्तावशृणुव । पुण्यकर्मभिर्धर्मं संचित्य मृताः स्वर्गे जन्मान्तरे च विद्याद्रूपादीन्गुणानाप्नवाम । यज्ञेषु होतृप्रचोदिता अध्वर्यवः सोमं सुन्वताम् । महावने त्रिरात्रं परिभ्रम्य चतुर्थदिवसस्य मध्याह्ने गिरिशिखरमवाप्नुवत । मूलफलादि वन आहारार्थं प्राचिन्वीरंस्तपस्विनः । पण्डितः शिष्येभ्यः शब्दशास्त्रं व्यवृणोत् ॥

# ३६

यो ऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ २४ ॥
यस्करोत्यशुभं कर्म शुभं वा यदि सत्तम ।
अवश्यं तत्समाप्नोति पुरुषो ऽत्र न संशयः ॥ २५ ॥
कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥ २६ ॥

यो ब्रह्मणा कर्णावावृणोति तं पितरं मातरं च मन्वानो न द्रुह्येत्तस्मै कदाचन । इदं ते लोभान्धस्य वृत्तं मनसि चमत्कारमातनोति । भो राजन्नीतिज्ञानां मन्त्रिणामभिप्रायं श्रुत्वा यद्धितं तत्स्वीकुरुष्व । अस्मद्यशांसि दिक्षु प्रतनुयुरिति मत्वा भूयसीं श्रियं भूभुजः कविभ्यो विभजन्ति । मांसमूलफलादि प्रभूतव्यञ्जनैः सूदा महानसे संस्कुर्युः । शत्रुषूपगतेषु शूरा युद्धाय सज्जीभूय स्वगुणानाविष्कुर्वन्तु । अप्सरसस्तिरस्करिण्या

वपुस्तिरस्कुर्वते ऽविज्ञाताश्च मनुष्या३नुपागच्छन्ति ॥

## ३७

परकाव्येन कवयः परद्रव्येण चेश्वराः ।
निर्लुण्ठितेन स्वकृतिं पुष्णन्त्यद्यतने क्षणे ॥ २७ ॥
विवेकिनमनुप्राप्य गुणा यान्ति समुन्नतिम् ।
सुतरां रत्नमाभाति चामीकरनियोजितम् ॥ २८ ॥

यज्ञं विधातुमिच्छन्यजमानः प्रथमं वेदविद् ऋत्विजो वृणीताम् । यज्ञेषु पशून्स्वलंकृतेषु यूपेषु रज्जुभिर्बध्नन्ति । देवानां कोपाग्निं शान्तिं नेतुं तान्स्तुतिभिर्नलराजो ऽप्रीणात् । प्रसन्ना वयं वरं वृणीष्वेति तैरुक्तो राजा धार्मिकत्वमवृणीत । सोमं दृषद्भ्यां सुत्वाध्वर्यवस्तं पुनन्तु । मन्दरपर्वतं मन्थानं शेषनागं च नेत्रं कृत्वा देवदानवा अमृतार्थं क्षीरोदधिममथ्नन् । यथा सूर्य उदये भाति तथा पापान्यपहत्य गङ्गाजलाप्लुता नरा विभान्ति । लुब्धमर्थेन गृह्णीयात्क्रुद्धमञ्जलिकर्मणा ॥

## ३८

स्तुवतो दुहिता त्वं वै याचतः प्रतिगृह्णतः ।
अथाहं स्तूयमानस्य ददतो ऽप्रतिगृह्णतः* ॥ २९ ॥
पुष्पाणीव विचिन्वन्तमन्यत्र गतमानसम् ।
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवम् ॥ ३० ॥

भो दुष्कृतकारिणः । अस्माद्दूरादपेतेति क्रोधादृषिराश्रमहरिणवधोद्यतान्व्याधानब्रवीत् । गुरुमभिवाद्य शिष्यस्तं ब्रूयादधीष्व भो इति । कानि शास्त्राणि काश्यां त्वमध्यैथाः । न्यायादीनि षड्दर्शनानि श्रीनीलकण्ठपण्डितस्य गृहे३ ऽहमध्यैयि । अग्नीषोमावष्टाभिरृग्भिरृषिरस्तौदिन्द्रावरुणौ च तिसृभिः । उद्योगिनं पुरुषसिंहं स्वयमुपैति लक्ष्मीः । सा जिह्वा या जिनं स्तौति तच्चित्तं यज्जिने रतम् । आचार्याः शिष्यान्धर्मं प्रब्रुवते । हतसहचराः सारसाः करुणं विरुवन्ति । श्रीमद्भी राजभिराहूताः पण्डिताः सभां यन्ति धर्मप्रश्नांश्च विब्रुवते ॥

## ३९

करोति पापं यो ऽज्ञानान्नात्मनो वेत्ति च क्षयम् ।
प्रद्वेष्टि साधुवृत्तांश्च स लोकस्यैति वाच्यताम् ॥ ३१ ॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ ३२ ॥

सर्वं वृत्तान्तं यथावृत्तमाचड्ढ्वम् । शर्व इति प्राञ्चः शिवमाचक्षते भव इत्युदञ्चः । यदा स देवो जागर्ति तदेदं चेष्टते जगत् । प्रद्विषतीं भार्यां किं

मां देहीत्यब्रवीत्पतिः । पुराणेषु त्रिभुवनसर्गस्थितिप्रलयान्व्यासो व्याचष्टे । योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमेभिर्मन्त्रैर्हनाम । यो ब्रह्मचर्यं चरित्वा गुरुणानुज्ञातो यथाविधि स्नाति तं सर्वलोकपूज्यं स्नातकं विदुः । अनपराद्धं तवोपकुर्वाणं कथं भोः पापात्मंस्त्वं मां हंसि । अशुचिलिप्तमङ्गं मृदा प्रमृष्टमद्भिः परिमृड्ढि । भवो दिवो भव ईष्टे पृथिव्याः । गां धयन्तीं परस्मै नाचक्षीत । बद्धमपि पृथ्वीराजं निर्दया यवना असिनाघ्नन् ॥

# ४०

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ३३ ॥

स्तेनो मुसलं स्कन्धे कृत्वा मुक्तकेशो राजानमुपेत्य शाधि मामिति ब्रूयात् । मित्रध्रुक्षु पापेषु न विश्वसिति बुद्धिमान् । महोदधिमध्ये शेषनागमधिशयानो विष्णुः सुखं स्वपिति । प्रमत्तैर्ऋत्विग्भिर्भूमौ निहितानि हवींषि श्वानाववालीढाम् । सुखमास्तां भवानिति गन्तुमनुज्ञातो ऽपयन्सखा सखायं ब्रूयात् । सुन्दरि समाश्वदिहि समाश्वसिहीति भयनिमीलिताक्षीमुर्वशीं पुरूरवा अब्रवीत् । गुरुक्रोधभीता शिष्या वेदानधीयाना रात्रिमजागरुः । अस्तु यशः श्रुतवृत्ते त्वां श्रियः सन्तु न तु भक्तिं विना स्वर्गं प्राप्नुयाः । दानोपभोगहीनः पुमाञ्श्वसन्नपि न जीवति । दीर्घसत्त्रमुपासते ये ब्रह्मचर्यं चरन्ति ॥

# ४१

यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिनेदिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ ३४ ॥
यश्च काष्ठमयो हस्ती यश्च चर्ममयो मृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति ॥ ३५ ॥

यः सर्वभूतेभ्योऽभयं दत्त्वा प्रव्रजति तस्माद्यतेर्भूतानि न बिभ्यति स च तेभ्यो न बिभेति । सायंप्रातर्ब्रह्मचारी प्रत्यहं समिधमग्नावादध्यात् । ये द्वे कालं विधत्तस्ते महती ज्योतिषी स्तवीमि । नैकं पुत्रमन्यस्मै दद्यादन्यस्मात्परिगृह्णीयाद्वा । यस्मान्महिषासुरात्सर्वेऽपि देवा अबिभयुस्तं शिवस्य पत्नी पार्वती न्यहन् । भिक्षां भवति देहीति क्षत्रियो भिक्षां चरन्ब्रूयात् । रुजा जरसा वाक्रान्तं पतिं पत्नी कदापि न जह्यात् । यत्र भूषणालंकृतां कन्यां पिता यज्ञभूम्यामृत्विजे ददाति स दैवो विवाह उच्यते । शत्रूनायातो दृष्ट्वा क्षत्रियाविपू धनुषोः समधत्ताम् । प्रायश्चित्तार्थेऽष्टशतं घृताहुतीनां जुहुधि ॥

## ४२

यद्ध्यायते यत्कुरुते धृतिं बध्नाति यत्र च ।
तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन ॥ ३६ ॥
यस्यांयस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यांतस्यामवस्थायां भुङ्क्ते जन्मनिजन्मनि ॥ ३७ ॥
दूत एव हि संधत्ते भिनत्त्येव च संहतान् ।
दूतस्तत्कुरुते कर्म येन भिद्यन्ते वा न वा ॥ ३८ ॥
ये गा हिंसन्ति तेषां गरीयः प्रायश्चित्तं विदधति तस्माद्गा मा हिन्धि ।
जीवत्पुत्रपौत्रो वर्षशतं निष्कण्टकं राज्यं भुङ्क्ष्वेति कवयो महाराजमस्तुवन्
। यथा वातो बलेन वृक्षान्भनक्त्येवं त्वं मे द्विषो भङ्ग्धि । रणे
शत्रुभिर्युध्यमानः शूरः कांश्चिदिषुभिरभिनत्केषांचिन्मूर्धहस्तपादादिकम-
सिनाच्छिनत् । प्रातरश्विनावुषसा स्वस्रा सह भूतानि जागरयितुं
त्रिचक्रे रथेऽश्वौ युङ्क्त इत्यृक्षु श्रूयते । यो भूमिदानमाच्छिन्द्यादाच्छिद्य
मानं वानुमोदेत स पञ्चभिर्महापातकैः संयुक्तः स्यात् । अहो प्रतिकूलो
विधिर्विशिनष्टि मनोरुजं मे । यत्र पित्रादीनां बन्धूनां शिरांसि भिन्दन्तो
रुदतीं कन्यां३ बलाद्धरन्ति तं त्वात्रं विवाहमृषयो विदुः ॥

---

Ответы к Бюлеру (1/2)
к.ф.н. М.Ю. Гасунс
http://samskrtam.ru

Редакция 2005 г., г. Минск
(сгенерирован из .txt 13.03.2015)
http://groups.google.com/group/nagari/